२९७२ पृ० चोरगणेशशब्दपरिशिष्टम् ।

चोरगणेशमन्त्रादिकमुक्तं गणेशविमर्षिण्याम् "चक्षुर्द्वयं तथा कर्णद्वयं नासापुटद्वयम् । मुखं नाभिं लिङ्गमूलं गुदस्थानं तथैव च । मनोद्वारं भ्रुवोर्मध्ये दशैव द्वारसंज्ञिताः । अङ्कुशं प्रथमं वीजं हृदये दशधा जपेत् । प्रजपान्ते ततो मातः! कवाटं निःक्षिपेत्ततः । कर्णयोश्च तथा कूर्च्चं कालीं नासापुटे ततः । मुखे स्त्रीं द्विविधं वीजं नाभौ वाणीं ततो जपेत् । हसौं वीजं लिङ्गमूलेदं गुदे परिकीर्त्तितम् । ओंकारञ्च भ्रुवोर्मध्ये मनःस्थाने तथैवच । एतदेकादशं वीजं प्रतिद्वारे कपाटवत् । चोरगणेशमन्त्र जप्त्वा कर्ममात्रं न कुर्य्यात् । यदि कुर्य्यात्तदादोष उक्तो वर्णविलासतन्त्रे । "गणेश उवाच । अधुनाहं प्रवक्ष्यामि चोरमन्त्रमतः शृणु । चोरमन्त्रपरिज्ञानं विना हे ब्राह्मणेश्वरि ! । पुराणं प्रपठेद्यस्तु स एव मूर्त्तिमान् कलिः । परजन्मनि पापिष्ठः स भवेच्चौरकुक्कुरः । शिवपूजा विष्णुपूजा शक्तिपूजा तथैवच । सर्वपूजासु यत्तेजो हरते गणपः स्वयम् । पञ्चाशद्गणदेवानां ज्योतींषि मुनिपुङ्गवा ! । प्रतिद्वारपथे गत्वा प्रतिपद्मेषु जृम्भते । हरन्ति जपतेजांसि प्रतिपद्मेषु संस्थिताः । जपपूजासु यत्तेजस्तत्र चौरो गणाधिपः । तस्माच्चौरप्ररोधार्थं चौरमन्त्रं जपेद्बुध । ततस्तु पूजयेद्धीमान् यस्य या इष्टदेवताः । ततः फलमवाप्नोति ब्रह्मादित्रिदिवौकसः । चौरमन्त्रं महामन्त्रं पञ्चाशद्गणतोषणम् । चौरमन्त्रं विना भद्रे ! शान्तिस्वस्त्ययनं कुतः । कर्णद्वयं तथा चक्षुर्द्वयं नासा मुखं ततः । नाभिस्थाने लिङ्गमूले गुदस्थाने तथैव च । मनोद्वारं भ्रुवोर्मध्यं दशैकं द्वारमीरितम् । प्रतिद्वारे न्यसेन्मन्त्रं चौराख्यं ब्राह्मणेश्वरि ! । चौरमन्त्रञ्चाह भद्रे ! प्रतिद्वारे कपाटवत् । रहस्यं ते प्रवक्ष्यामि पञ्चाशद्गणतोषणम् । अङ्कुशं पञ्चमं वीजं प्रथमे दशधा जपेत् । प्रजप्य सुभगे ! मातः ! कपाटं निःक्षिपेत्ततः । अन्यथा अङ्कुशैर्वीजैः कपाटं भेदिरे गणाः । चन्द्रिकान्तर्गदानित्यं शङ्करं वरसुन्दरम् । चन्द्रिकासु समालीनः शिञ्जिनी अणिमा गुणः । चन्द्रविन्द्वात्मिका नित्या गणेशपरिपूजिता । ह्रीं ह्रीं वीजद्वयमिति विन्यसेन्नयनद्वये । कर्णयोश्च तथा ह्रौं ह्रौं ऊँ ऊँ नासाद्वये तथा । मुखे स्त्रीं द्विविधं वीजं नाभौ क्लीं सुभगेश्वरि ! । हसौं वीजं लिङ्गमूले गुदेवं परिकीर्त्तितम् । ऊङ्कारञ्च भ्रुवोर्मध्ये मनस्थाने तथैव च । एतदेकादशद्वारे चौरमन्त्राणि विन्यसेत् । दशधा चौरमन्त्रञ्च एकधा वापि वीजकम् । अनेनैव जपेनापि प्रतिद्वारे कपाटकम्" । जपकालोऽपि तत्रैव । "शृणु चापि प्रवक्ष्यामि मन्त्रस्य जपनिर्णयम् । प्रातःकाले च शय्यायां मुक्तस्वापः स्वदेहके । पूर्ववन्मातृकान्यासं विन्यसेन्मातृकास्थले । तथा एकादशद्वारे चौरमन्त्राणि विन्यसेत् । दशधा चौरमन्त्रञ्च एकधा वापि संजपेत् । चौरमन्त्रजपात् तुष्टिर्गणेशस्य तदा भवेत् । यमस्य नाधिकारोऽपि चौरमन्त्रजपात् प्रिये ! । सर्वमन्त्रजपात्तेजः सर्वस्मात् समुपस्थितम् । तत्तेजो हरणे शक्तिर्गणेशस्य नचैव हि" चोरगणेशोऽप्यत्र ।

अयञ्चशब्द उक्तपृष्ठे चोरकशब्दात् परं बोध्यः तत्र च कर छिद्रे त्यत्र करणच्छिद्रे ति शुद्धम् करणं च नेत्रादि । छिद्रं द्वारानावरणम् ।

---

### छ

छकारो व्यञ्जनवर्णभेदः स्पर्शसंज्ञस्तस्योच्चारणस्थानं तालु आभ्यन्तरप्रयत्नः जिह्वामध्येन तालुस्पर्शः । वाह्यप्रयत्नाः विवारश्वासाऽघोषा महाप्राणश्च । मातृकान्यासेऽस्य वामकूर्परे न्यासः । तन्त्रमते अस्य वाचकशब्दाः । "छश्छन्दनं सुषुम्णा च पशुः पशुपतिः स्मृतिः । निर्मलं तरलं वह्निर्भूतमाता विलासिनी । एकनेत्रश्च चपली द्विशिरा वामकूर्परः । गोकर्णो लाङ्गली रामः काममाता सदाशिवः । माता निशाचरः पायुर्विक्षतः स्थितिशब्दकः" वर्णाभिधानम् । "मातृकावर्णात्मिकायास्तस्या ध्यानमुक्तं वर्णोद्धारतन्त्रे "ध्यानमस्याः प्रवक्ष्यामि द्विभुजां तु त्रिलोचनाम् । पीताम्बरधरां नित्यं वरदां भक्तवत्सलाम् । एवं ध्यात्वा छकारन्तु तन्मन्त्रं दशधा जपेत्" । काव्येऽस्य प्रथमनिर्देशफलं वृ० र० टी० उक्तं यथा "कः खोगो घश्च लक्ष्मीं वितरति वियशोङस्तथा चः सुखं छः प्रीतिं जोमित्रलाभमित्यादि" ।

छ पु० १छकारवर्णे । छो—घञर्थे भावे क । २छेदने स्त्री